संस्कृतवार्ताः

दिनाङ्क :- 09.02.2026 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री- सेशेल्स् राष्ट्रपतिन

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्यां सेशेल्स्-देशस्य राष्ट्रपतिना डा. पैट्रिक् हर्मिनी इत्यनेन सह वार्तालापं विधास्यति। उभयनेतृभिः द्विपाक्षिक-क्षेत्रीय-अन्ताराष्ट्रिय-विषयेषु परस्पर-हितविषयेषु चर्चा च भविता। राष्ट्रपतिः हर्मिनी अद्य सायङ्काले राष्ट्रपतिभवने राष्ट्रपतिपदासीनया द्रौपदी मुर्मू वर्यया सह अपि मिल्यात् । भारतस्य पञ्चदिवसीय-यात्रावधौ श्री हर्मिनी, चेन्नै-मुम्बै-नगरयोः कार्यं विधाय ह्यः नवदेहलीं अगमत्।

### प्रधानमन्त्री -परीक्षा पे चर्चा

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः परीक्षा पे चर्चा इत्यस्य द्वितीये चरणे अशेषे हि देशे छात्रैः सह संवादं करिष्यति। कार्यक्रमः प्रातः दश वादने बहुविध-मञ्चेषु प्रसारितो भविष्यति। बोर्ड्-परीक्षामुद्दिश्य , परीक्षायाः अतिचिंतनं परिहर्तुं, सज्जता-कार्यनीतीः, समय-प्रबन्धनम्, छात्राणां आत्मविश्वासस्य वर्धनं इत्यादिषु विषयेषु संवादोऽयं भविष्यति। अस्मिन् अध्याये तमिळुनाडुराज्यस्य कोयम्बत्तूर्-नगरतः, छत्तीसगढराज्यस्य राय्पुर्-नगरात्, गुजरातराज्यस्य देवमोगरा-नगरात्, अस्साम्-राज्यस्य गुवाहाटी-नगरात् च परीक्षा-योद्धारः दृश्यन्ते इति प्रधानमन्त्री सामाजिक- अंतर्जालीय पटले अवदत्। परीक्षा पे चर्चा इत्यस्य एतत् प्रकरणं प्रधानमन्त्रिण: नरेन्द्र-मोदिन: -यू-ट्यूब्-वाहिन्यां, दूरदर्शने, शिक्षा-मन्त्रालयस्य सामाजिक-माध्यम-मञ्चेषु च प्रसारितं भविष्यति। अस्य मासस्य षड् दिनाङ्के प्रथमं प्रकरणं प्रसारितम्, यस्मिन् प्रधानमन्त्रिणा मोदिना प्रश्नानाम् उत्तरानि दत्तानि, प्रतिभागिभिः सह स्नेहपूर्वकं संवादः च विहितः।

### प्रधानमन्त्री-मलेशिया

प्रधानमन्त्रिणा नरेन्द्रमोदिना आतङ्कवादस्य विषये भारतस्य दृढस्थितिं पुनरुच्चारितम्। कुआलालंपुर-नगरे मलेशिया-देशस्य समकक्षीयेण अन्वर इब्राहिम इत्यनेन सह विस्तृतं वार्तालापस्य अनन्तरं संयुक्त-वार्ताहरसम्मेलने श्रीमोदी उक्तवान्।

भारत-मलेशिया-देशयोः मध्ये आतङ्कवादावरोधः, गुप्तसूचनानाम् आदान-प्रदानम्, समुद्रीयसुरक्षायाः, रक्षायाः च क्षेत्रेषु सहयोगस्य विस्तारः भविष्यति इति श्रीमोदी अवधानं प्रदत्तवान्।

प्रधानमंत्रीः अवदत् यत् भारत-मलेशिया-देशयोः मध्ये समुद्रीय-प्रतिवेशिनां रूपेण विशेष-सबन्धः अस्ति, अपि च मलेशिया-देशे भारतीय-प्रवासिनाम् उपस्थितिः, जनेषु दृढसम्बन्धः च अस्ति इति। प्रधानमन्त्री अवदत् यत्, उभौ देशौ आसियान् इत्यनेन सह सम्पूर्णे क्षेत्रे विकासाय, शान्त्यर्थं, स्थिरतायै च प्रतिबद्धौ स्तः।

मलेशिया-देशस्य तमिळ्-भाषया सह द्वयोः राष्ट्रयोः मध्ये दृढ-सांस्कृतिक-शैक्षणिक-सम्बन्धस्य विषये प्रधानमन्त्री अवदत्। प्रधानमन्त्रिणः मोदिनः मलेशिया-देशस्य समकक्षीयेण सह वार्तालापः रक्षा-सुरक्षा-सम्बन्धान् सुदृढं कर्तुं, आर्थिक-नवान्वेषण-सहभागितां वर्धयितुं च केन्द्रितः आसीत्।

भारत-मलेशिया-देशयोः मध्ये अनेकाषाम् अभिलेखानां सन्धि पत्राणां च आदानप्रदानम् अभवत्।

तत् पश्चात्, प्रधानमन्त्री मोदी द्वयोः देशयोः मध्ये व्यापारस्य, निवेशस्य, आर्थिक-सम्बन्धस्य च सुदृढीकरणाय मुख्यकार्यकारी-अधिकारिभिः, व्यापारनेतृभिः च सह वार्तालापम् अकरोत्।

## शूटिङ्ग्-क्रीडायां

शूटिङ्ग्-क्रीडायां भारतस्य अर्जुन बाबूता अपि च एलावेनिल वलारिवन इत्युभौ नवदिल्ली-नगरे षड्विंशत्यधिक द्विसहस्रतम वर्षस्य एशियन् रायफल/पिस्टल्-चैम्पियन्शिप् स्पर्धायां दश मीटर्-एयर-रायफ़ल-मिश्र-दल-स्पर्धायां स्वर्णपदकं प्राप्तवन्तौ विश्व-किर्तिमतं च स्थापितवन्तौ।

।। इति वार्ता:।।